# द्वे मित्रे

एकदा गोपालः सुरेशेन सह उद्यानम् अगच्छत्। तौ तत्र द्वौ आम्रवृक्षौ अपश्यताम्। वृक्षयोः पक्वानि फलानि दृष्ट्वा लालायितौ अभवताम्। उद्यानपालकम् उपेत्य तौ अपृच्छताम् - "भद्र, आम्राणां किं मूल्यम्?" सः प्रत्यवदत् - "त्रिभिः रूप्यकैः पञ्चाशत् फलानि यच्छामि।" गोपालः अचिन्तयत् - 'अद्यास्माकं गृहे चत्वारः अतिथयः आगताः। तेषाम् आतिथ्यं प्रभूतैः स्वादुव्यञ्जनैः कर्तव्यम्। घृतदधिशर्करादिभिः समृद्धैः भोजनैः सह फलान्यपि सन्तु। अतः शतं फलानि क्रेतुम् इच्छामि।' ततः सः उद्यानपालकम् अवदत् - "यच्छतु भवान् षड्भिः रूप्यकैः शतं फलानि।" सुरेशेन केवलं पञ्चविंशतिः फलानि क्रीतानि।

अथ तौ शताधिकानि आम्राणि वोढुं असमर्थौ मार्गे एकं यानम् अवलोक्य वाहकम् अपृच्छताम् - "अस्मात् स्थानात् आदर्शनगरं यावत् कियत् भाटकं भविष्यति?" वाहकः प्रत्यवदत् - "आदर्शनगरम् अतिदूरम् अस्ति। भाटकम् अष्ट रूप्यकाणि।"

सुरेशः अभणत् - "अधुना नव-वादन-समयः अस्ति। होरार्धेन तत्र गन्तुं शक्नुवः न वा, यतः दश-वादन वेलायां विद्यालये ममोपस्थितिः अनिवार्या अस्ति। अतः यानेनैव गन्तव्यम्।"

एवं विचार्य पुनः वाहकम् अपृच्छत् - "भद्र, आवां चत्वारि रूप्यकाणि एव दातुं शक्नुवः। कृपया वाहयतु भवान्।" तयोः स्थितिं ज्ञात्वा वाहकोऽपि दयालुस्सन् चतुर्भ्यः रूप्यकेभ्यः तौ वाहयितुम् उद्यतः अभवत्।